योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०१६

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १

सर्गः २

सर्गः ३

सर्गः ४

सर्गः ५

सर्गः ६

सर्गः ७

सर्गः ८

सर्गः ९

सर्गः १०

सर्गः ११

सर्गः १२

सर्गः १३

सर्गः १४

सर्गः १५

सर्गः १६

सर्गः १७

सर्गः १८

सर्गः १९

सर्गः २०

सर्गः २१

सर्गः २२

सर्गः २३

सर्गः २४

सर्गः २५

सर्गः ६५

सर्गः ६६

सर्गः ६७

सर्गः ६८

सर्गः ६९

सर्गः ७०

सर्गः ७१

सर्गः ७२

सर्गः ७३

सर्गः ७४

सर्गः ७५

सर्गः ७६

सर्गः ७७

सर्गः ७८

सर्गः ७९

सर्गः ८०

सर्गः ८१

सर्गः ८२

सर्गः ८३

सर्गः ८४

सर्गः ८५

सर्गः ८६

सर्गः ८७

सर्गः ८८

सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२
सर्गः ११६
सर्गः ५३
सर्गः ११७
सर्गः ५४
सर्गः ११८
सर्गः ५५
सर्गः ११९
सर्गः ५६
सर्गः १२०
सर्गः ५७
सर्गः १२१
सर्गः ५८
सर्गः १२२
सर्गः ५९
सर्गः १२३
सर्गः ६०
सर्गः १२४
सर्गः ६१
सर्गः १२५
सर्गः ६२
सर्गः १२६
सर्गः ६३
सर्गः १२७
सर्गः ६४
सर्गः १२८

षोडशः सर्गः १६

श्रीवसिष्ठ उवाच ।

अथ तत्याहमपतं दीप्यमानवपुः पुरः ।

किंचिद्विक्षोभितसभः खान्नक्षत्रमिवाचले ।। १

चुक्षोभ वायसास्थानं नीलोत्पलसरःसमम् ।

मत्पातमन्दवातेन भूकम्पेनेव सागरः ।। २

अशङ्कितमपि प्राप्तं दर्शनान्मामनन्तरम् ।

भुशुण्डस्तु वसिष्ठोऽयं प्राप्त इत्यवबुद्धवान् ।। ३

पत्रपुञ्जात्समुत्तस्थौ मेघशाव इवाचलात् ।

हे मुने स्वागतमिति प्रोवाच मधुराक्षरम् ।। ४

संकल्पमात्रजाताभ्यां कराभ्यां कुसुमाञ्जलिम् ।

मह्यमाशु तदैवादान्मेघो हैममिवोत्करम् ।। ५५

इदमासनमिप्युक्त्वा नवं कल्पतरुच्छदम् ।

उपानीतवति त्यक्तभृत्ये वायसनायके ।। ६

भुशुण्ड उत्थिते स्वीयकलापक्षेषु पक्षिषु ।

उपविष्टं मुनिं दृष्ट्वा स्वासनोन्मुखदृष्टिषु ।। ७

समन्तात्खगवृन्देन भुशुण्डेन समं ततः ।

तस्मिन्कल्पलतापुञ्जे ह्युपविष्टोऽहमासने ।। ८

अर्घ्यपाद्यादि संपाद्य भुशुण्डस्तुष्टमानसः ।

मामुवाच महातेजाः सौहृदान्मधुराक्षरम् ।। ९

भुशुण्ड उवाच ।

अहो भगवताऽस्माकं प्रसादो दर्शितश्चिरात् ।

दर्शनामृतसेकेन यत्सिक्ताः सद्द्रुमा वयम् ।। 6.1.16.१०

मत्पुण्यचिरसंभारप्रेरितेन त्वयाधुना ।

मुने मान्यैकमान्येन कुतश्चागमनं कृतम् ।। ११

कच्चिदस्मिन्महामोहे चिरं विहरतस्तव ।

अखण्डितैव समता स्थिता चेतसि पावने ।। १२

किमर्थमद्यागमनक्लेशेनात्मा कदर्थितः ।

वचनश्रवणोत्कानामाज्ञां नो वक्तुमर्हसि ।। १३

त्वत्पाददर्शनादेव सर्वं ज्ञातं मया मुने ।

त्वदागमनपुण्येन वयमायोजितास्त्वया ।। १४

चिरंजीवितचर्चाभिर्वयं वः स्मृतिमागताः ।

तेनेदमास्पदं पादैस्त्वं पवित्रितवानयम् ।। १५

ज्ञातत्वदागमोऽप्येवं त्वां पृच्छामीह यन्मुने ।

भवद्वाक्यामृतास्वादवाञ्छितं प्रविजृम्भते ।। १६

इत्युक्तवानसौ पक्षी भुशुण्डश्चिरजीवितः ।

त्रिकालामलसंवेदी तत्र प्रोक्तमिदं मया ।। १७

श्रीवसिष्ठ उवाच ।

विहंगम महाराज सत्यमेतत्त्वयोच्यते ।

द्रष्टुमभ्यागतोऽस्म्यद्य त्वामेव चिरजीवितम् ।। १८

आशीतलान्तःकरणो दिष्ट्या कुशलवानसि ।

पतितोऽसि न बुद्धात्मा भीषणां भववागुराम् ।। १९

तदेतं संशयं छिन्धि भगवन्मम सत्यतः ।

कस्मिन्कुले भवाञ्जातो ज्ञातज्ञेयः कथं भवान् 6.1.16.२०

कियदायुश्च ते साधो वृत्तं स्मरसि किंच वा ।

केनायं वा निवासस्ते निर्दिष्टो दीर्घदर्शिनः ।। २१

भुशुण्ड उवाच ।

यत्पृच्छसि मुने सर्वं तदिदं वर्णयाम्यहम् ।

अनुद्वेगितया यत्नात्कथा श्राव्या महात्मना ।। २२

युष्मद्विधास्त्रिभुवनप्रभुपूज्यरूपा

आकर्णयन्ति यमुदारधियो महान्तः ।

तेनाशुभं प्रकथितेन विनाशमेति

मेघास्पदेन विभवेन यथार्कतापः ।। २३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० वसिष्ठभुशुण्डसमायोगो नाम षोडशः सर्गः ।।१ ६ ।।